# पदाति बन्धः

दुष्टसंहार सत्काम महत्सु विलसद्दय ।

मम त्वं शरणं भूयाः रतपूत रमापते ॥ 35 ॥

दुष्टेति । रतानां-स्वविषयक रागवतां पूत परिशुद्धिकर स्वभक्तान् पापक्षयेन शुद्धीकरोतीति भावः ।

शिष्टं स्पष्टः ।



# अयमपि पदाति बन्धः

पद्मतुल्यपदद्वन्द्व परेदैवत रक्ष माम् ।

परसारहशक्रादि-मादित्येश रमापते ॥ 36 ॥

पद्मेति । परसारहा-परेषां - शत्रूणां सारं-बलं हन्तीति परसारहः । शक्रः आदिमः येषां तेषां आदित्यानां देवानां ईश । एवं भूतं परेदैवत-नारायण मां रक्ष ।



# षष्टं आयुध बन्ध प्रकरणम्

## खड्ग बन्धः

देव तव स्त्व रचनं मोदशद त्रिदशदुर्लभं राम ।

मन्दमतिरीतिरहं स त्रिदश श्रेष्ठेश किं करोम्यसम ॥ 37 ॥




देवति । मोदशद-मोदः सन्तोषः शं-सुखं, एते ददातीति मोदशदः । त्रिदश श्रेष्ठानां महेन्द्रशिव ब्रह्मणामीश असम-अतुल्य हे देव राम । तव स्तव रचनं त्रिदशदुर्लभं-तैरपि कर्तुं न शक्यं । मन्दमतिरीतिः जडस्वभावः * * * * त्वं यथा त्रिदशश्रेष्ठेशः तथा अहं सर्वजडश्रेष्ठः इति भावः । किं करोमि त्वदीय स्तुति बद्धोऽपि मदशक्य इत्यर्थः ।



# कठारि बन्धः

राजराजराजमित्र देवदेवपाव मा मारवीर पाश एष मामिहाद्य बधते ।

ते भवाब्धिनाव धूर्व हे पदे भजे क्षमा-मानिवास सूरिसेवितांबुजोपमेहिते ॥ 38 ॥

राजेति । राजराजः कुबेरः राजा-चन्द्रः मित्रः-सूर्यः देवदेवः इन्द्रः एतान् पातीति तयोक्तम् सर्वामर रक्षकेत्युक्तं च । सूरिसेवित-नित्यसूरि-संसेवित । क्षमा मा निवास-क्षान्ति लक्ष्मी निवासभूत । हे भगवान् एष मारवीरपाशो मां अद्य बाधते हि । एष इति तत् बाधायाः प्रत्यक्षतः प्रदर्शनं, तस्मात् संसार सागरनावभूते ते पदे पद्मसदृशे भजे । मामवेत्यर्थः ।



# त्रिशूल बन्धः

श्री भूमिनायकादंभा भासते हह ते सभा ।
भास्तंभन नभस्तंभा भासुराववरासुभा ॥ 39 ॥




व्या-श्रीभूमिनायकेति । श्री भूमिनायक ! लक्ष्मी भूमिपते ! भास्तंभन-स्वकीय तेजसा सर्वान् स्तंभयसीति भावः । नभस्तंभा-परम व्यापस्य सहस्र संख्याक सथूणा शोभिता । अदंभा-कपट लेशशून्या - सर्व हेयगुण रहितेत्युक्तम् । सुभा-शोभन दीप्तिमती शुद्धसत्वमयेत्यर्थः । भासुरा - स्वयं प्रकाशा! वरा-श्रेष्ठा । ते सभा भासते । परमपद इति शेषः । हहेत्याश्चर्ये । अव-मां रक्ष । मम तादृश सभाप्रवेशनं देहीति भावः ।

# कुन्त बन्धः

माहिपानशनादीन नतदास सदातन ।

नदीनशाशानदीन नदीनाशन पाहि मा ॥

छत्रबन्धे व्याख्यातोयं श्लोकः ।

(Sloka 25)




माहिति । मां-लक्ष्मीं, अहिं-आदिशेषं च तत्तत् उचित कैंकर्य प्रदानेन पातीति तथोक्तम् । अनशन अशनायाद्यतीत-अशनमत्र हेयगुणोपलक्षणम् । अदीन-परिपूर्ण । नतदास-आश्रितदास आश्रितानां सारथ्यादि दूतकार्यमपि करोतीति भावः । सदातन-सर्वकालिक । नदीनशः - क्षीराब्धिशायिन् । आशानदीन नदीनाशन - आशैव नदीनः समुद्रः तस्य नदीनाशनः अगस्त्यः । आश्रितानामिच्छाविषय दानेन तदिच्छा - नाशक इत्यर्थः । एवं भूत भगवन्, मा-मां पाहि ममापि त्वदीयं कैङ्कर्यसारांज्य दानेन रक्षतु इत्यर्थः । (नदी + इनः - नदीनः)

# परशु बन्धः

मारतारकजित् सारसामेतास्तुत दाशिषे ।
सुरजातस्तुता मे सा रसाजित्करता रमा ।। 40 ।।




मारेति । मारतारक जितौ-शिव सुब्रमन्यौ - तयार्यत् सारसमं - श्रेष्ठं स्तुतिरूपं साधुवाक्यं तेन इता - संगता । सुरजातस्तुता स्पष्टं । रसाजित् - क्षान्त्यादिगुणैः भूदेवी जेत्रक रता, के-विष्णौ रता सा-रमा । मे तदाशिषे - तथाविधाशिषे अस्तु । सुरजातापेक्षया शिवस्कन्धयोः पृथगुपादानं तयोः कैश्चित् परत्वांगीकारात् ताभ्यामपि स्तुतत्वोक्त्या तस्याः सर्वोत्कृष्टत्वद्योतनार्थम् । को ब्रह्मात्मानिलार्काग्नि चित्त धीयम के किषु । विष्णाविति नानार्थरत्नमाला ।

## चाप बन्धः

वैदेहजापतिप्रीतिः पुरुषार्थ प्रदायिनी ।

तदन्य दयया किं स्यात् तमेवेडे सदा मुदा ॥ 41 ॥

स्पष्टोर्थः ।







## शर बन्धः

रजस्तमोमुडंभोरुट्-समस्योदधिजापदः ।

रजस्तमोजडं भीरुम्मामव्यादघजापदः ॥ 42 ॥

रजेति । अम्भोरुट्समस्य-पद्मसदृशस्य उदधिजापदः लक्ष्मीचरणस्य तमोमुट्-तमोहरं रजः - पांसुः । रजस्तमो जडं-रजस्तमोभ्यां जड भूतम् भीरुं संसार भीरुं मां, अघजापदः बीजाङ्कुरन्यायेन संसारस्य कार्य्यभूतैः कारणभूतैः च अघैर्जन्या या आपत्-अविद्यावासनारुच्सादिकं तस्मात् अव्यात् ।

# खेट बन्धः

सारागसाम भूत्सारा भासा रामेण सत्गतिः ।

गतिः को दिव्यभूत् भूमौ काकाभासस्य शंस मे ॥ 43 ॥

मध्यस्थ कोणाक्षरैः-राराराम-इत्युद्धारः ।




सारागसां - प्रयाश्चित्ता विनाश्यत्वेन सारभूतानेक पापवतां अपि, भासा-स्वतेजसा, सारा - उत्कृष्टभूता सत्गतिं - परम प्राप्य भूत फलं - मोक्ष इत्यर्थः रामेण अभूत् । प्रपत्तिद्वारेतिभावः । काकाभासस्य - मैथिली वक्षस्थल व्रणकरणरूप महापराधयतः काकासुरस्य दिवि भूमौ वा गतिः - रक्षकः कः अभूत् । मे शंस । श्री रामभद्रादेव हि तस्य रक्षणमभूत् इति भावः । स पित्राचेत्यादि श्रीमद्रामयण श्लोकः अत्रानु सन्धेयः ।

# क्षुरिका बन्धः

वारितारिहरिप्रीता मारमाताविसेविता ।
तामसाशयनाशाशे शेशाना यशसा मता ॥ 44 ॥




वारीति । वारिताः अरयः येन तस्मिन् हरौ प्रीता । अविसेविता-सूर्यसेविता, सूर्यस्य ग्रहणं सर्वामरोपलक्षणार्थम् । तामसाशयानां-दुष्टताशयानां नाशे आशा-अभिप्रायो यस्यास्सा । ईशेशाना-ब्रह्मरुद्रादीनामपि नियन्त्री । यशसा मता-निरुपम यशसा सर्वसंमता मारमाता लक्ष्मीः रक्षकादि शेषः ।